# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – आचार्यः | प्रश्नपत्रम् – २ | गुणाः – ५० |
| विषयः – सर्वदर्शनम् | सत्रम् – ४ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १४/०७/२०२१ | सन्दर्भग्रन्थः – अद्वैतसिद्धिः (पञ्चमिथ्यात्वलक्षणपर्यन्त) | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ अद्वैतसिद्धिः द्वैतमिथ्यात्वसिद्धिपूर्वकं भवतीति स्पष्टयत।

२ त्रिविधां कथां सोदाहरणं प्रतिपादयत।

३ मिथ्यात्वे विप्रतिपत्तिं प्रदर्शयत।

**प्रश्नः २ विप्रतिपत्तिजन्यसंशयः विचारस्य अङ्गं नास्तीति पूर्वपक्षम् उत्थाय तस्य खण्डनं कुरुत।**

**प्रश्नः ३ "सदसत्त्वानधिकरणत्वं मिथ्यात्वम्" इति लक्षणं विवृणुत।**

**प्रश्नः ४ "सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं वा साध्यम्" इति ग्रन्थपङ्क्तिं निबध्नीत।**

**प्रश्नः ५ द्वितीयमिथ्यात्वलक्षणस्य सारांशं निबन्धरूपेण लिखत।**

**प्रश्नः ६ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ "गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वात्" इति व्याख्यानं कुरुत।

२ त्रैकालिकनिषेधस्य पारमार्थिकत्वेऽपि कथम् अद्वैतहानिः न भवति इति व्याख्यात।

३ निषेधस्य निषेधेन प्रतियोगिसत्त्वं न आयाति इति प्रतिपादयत।

**प्रश्नः ७ आर्थिकं मिथ्यात्वं प्रतिपादयत।**

**प्रश्नः ८ "ज्ञाननिवर्त्यत्वं मिथ्यात्वम्" इति लक्षणं निरूपयत।**

**प्रश्नः ९ चतुर्थमिथ्यात्वलक्षणं प्रतिपादयत।**

**प्रश्नः१० द्वितीय-चतुर्थलक्षणयोः मध्ये साम्यवैषम्ये प्रदर्शयत।**

**प्रश्नः११ अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत।**

१ सत्यज्ञानसुखात्मकः कः अस्ति?

२ मोक्षं प्राप्त इव कः विजयते?

३ अद्वैतसिद्धिकारः कः?

४ अद्वैतसिद्धिः केषां मुदे अस्तु?

५ अद्वैतसिद्धिः कस्य सिद्धिपूर्वकत्वात् भवति?

६ उपपादनं कथं भवति?

७ सिषाधयिषाविरहविशिष्टसिद्ध्यभावः इति कस्य लक्षणम्?

८ स्वकर्तव्यनिर्वाहाय केन विप्रतिपत्तिः प्रदर्शनीया?

९ का नाम सन्दिग्धानैकान्तिकता?

१० प्रथमं मिथ्यात्वलक्षणं केषाम् आचार्याणाम्?

११ द्वितीयलक्षणे उपाधिः इति पदस्य कः अर्थः?

१२ कः अभावः त्रैकालिकः निषेधः उच्यते?

१३ तृतीयमिथ्यात्वलक्षणं किम् अस्ति?

१४ चतुर्थं मिथ्यात्वलक्षणं केषाम् आचार्याणाम्?

१५ सिद्धान्ते जगत् सत्यम् अस्ति उत मिथ्या?

***